व्याकरण संस्कृत संपूर्ण

क्र.नं. ११ ८८। व्या. २३

दशलकारनिरूपणं — श्रीधरशास्त्री

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक.............
हस्तलिखित ग्रंथ संग्रह.

# कौमुदीपदबोधिनी ॥

## ॥ अथतिङन्तभ्वादिप्रक्रिया ॥

॥ बहुलिङ्गमलिङ्गं यदव्ययं धर्मवर्जितम् ॥
॥ शब्दातीतं शब्दवेद्यं शब्दब्रह्म नमामि तत् ॥ १ ॥

तत्रतावद् भगवतः पाणिनेरागमस्य मुख्यभागः प्रत्ययास्तेषां व्यवस्थार्थमवशिष्टभागः। चतुर्थपंचमयोरध्याययोर्नाम प्रत्ययाः कथितास्तथैवात्र तृतीयेऽध्याये धातुप्रत्ययाः कथिताः। उक्तंच कौमुद्यां "पूर्वार्द्धे कथितास्तुर्यपंचमाध्यायगोचराः। प्रत्यया अथ कथ्यंते तृतीयाध्यायगोचराः।" इति। नाम्नां प्रथमादिसप्त समुच्चयाः कृतास्तथैव क्रियापदानां लडादिदश समुच्चयाः कृताः परमत्रायंविशेषः। नाम्नां प्रथमाद्याः केवल संज्ञाः। लडादयस्तु यद्यपिसंज्ञास्तथापि ताः प्रत्ययाः कथयंतिवैयाकरणाः। तत्रस्थ इत् वर्जयित्वा ल् अंशोयं संस्थाप्य तस्य लकारस्य स्थाने आदेशरूपा भिन्नभिन्नाः प्रत्यया भवंतीत्ययमेव विशेषः। ताः संज्ञा यथा। लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ्। इतिदशलकाराः। एषु पंचमोलकारः लेट् संज्ञकश्छंदोमात्रगोचरः।" नतुलोके। ३२०७।३६४९ सि॰ कौ॰।

२१५१ ॥ वर्तमाने लट् ॥ ३।२।१२३ ॥ १

वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात्। अटावितावितिकौमुदी।

वर्तमान इति। विद्यमानक्रियायां वृत्तिर्यस्य धातोस्तत्परे (धातोः सकाशाद् यस्याः क्रियाया बोधः स्यात् साक्रिया वर्तमानकालिका यां सत्यां तद्धातोः परे) लट् प्रत्ययः स्यात्। अटाविति। लटि अकारटकारावितौ स्याताम्। एतेषामिता तामन्यदपिप्रयोजनमस्ति तथापि विशेषणार्थं (लिडित्याद्यन्यलकारेभ्योभिन्नत्वं दर्शयितुं) एते स्युरिति विशेयम्। इतिगते सति ल् अयमंशोवशिष्टः। सकर्मकाकर्मकभेदेन द्विविधा धातवः। व्यापाराश्रयः कर्ता। व्यापार

माश्रित्य क्रिया कर्ता स एव तस्याः क्रियायाः कर्तेति विज्ञेयम्। फलाश्रयं कर्म। क्रियायाः फलस्य य आश्रयस्तत्कर्म॥ ३।१।१२३। (२१५१)

**२१५२॥ लः कर्मणि च भावे चाकर्मकेभ्यः॥ ३।४।६९॥ २**

**लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः। अकर्मकेभ्यो भावे कर्तरि च॥ इति॥**

लकारा इति। धातोः सकर्मकेये पूर्वोक्ता दश लकारास्ते कर्मणि कर्तरि च स्युः। कर्मणो वा कर्तुर्बोधे कर्तव्ये सति तेषां योजना स्यादित्यर्थः। सत्यकर्मके ते भावे कर्तरि च स्युः। क्रियायाः केवलो भावो वा कर्तुर्बोधे कर्तव्ये सति तेषां योजना स्यादित्यर्थः। धातुभ्यः क्रियाकालयोर्बोधः। प्रत्ययेभ्यश्च कर्तृ कर्म भाव संख्यानां बोधः। अकर्मकधातवः के तद्विषये कारिका। " वृद्धिक्षय भय जीवित मरणं लज्जा सत्ता स्थिति जागरणम्॥ शयन क्रीडा रुचि दीप्त्यर्थं धातुगणं तमकर्मकमाहुरिति॥ २१५२। (३।४।६९॥

**॥२१५३॥ लस्य॥ ३।४।७७॥ ३**

**अधिकारोऽयमिति।** लकारस्थानेऽधिकारोऽयं तस्मादधिकार सूत्रमिदम्। तत्राधिकारो नाम पूर्वसूत्रोपात्त पदादेरुत्तरत्र सूत्रेष्वनुवृत्तिः। अधि प्रातिपदिकं। कृ कृतौ तनादि॰ उभयपदी सकर्मकः। अनिट्। करोति कुरुते अकार्षीत्। अकृत कृत्रिमः। भ्वादिश्च। उ॰ स॰ अनिट्। करति करते अकार्षीत् अकृत इति। घञ्॥ २१५३॥

**२१५४॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्॥ ३।४।७८॥ ४**

**एतेऽष्टादश लस्यादेशाः स्युरिति॥**

एतदिति। एतेतिबादयोऽष्टादश लस्य लकारस्थान आदेशाः स्युः। तत्रादेशो नाम प्रकृतिप्रत्ययोपघातक कार्यभेदः। वर्णस्थाने वर्णान्तरोत्पत्तिरिति वैय्याकरणाः। आ प्राति॰ दिश दाने आज्ञापने च तुदा॰ उभ॰ सक॰ अनिट्। दिशति अदिक्षत। भावे घञ्। इति शब्दस्तोम कृत्तारानाथ तर्कवाचस्पतिः। त आदेशा यथा। तिप् १ तस् २ झि ३ सिप् ४ थस् ५ थ ६ मिप् ७ वस् ८ मस् ९॥ त १० आताम् ११ झ १२ थास् १३ आथाम् १४ ध्वम् १५ इट् १६ वहि १७ महिङ् १८॥ इति। भिन्नभिन्न लकारार्थास्तेषामादेशानामर्थाश्चैते क्रमेण प्रतिपादयिष्यामः। सर्व लकाराणामेत एवादेशा भवंति। परं निमित्तवशात्प्रत्यये लकारस्य विशेषकार्य

किमपिस्यात्। एतेषामादेशानां प्रसंगवशादन्य आदेशा भवंति। इट् महिङ्। अत्रस्थौ टकार ङकारावितौ स्तः। टकारो विशेषणार्थः। ङकारो यं तिङ्। तङ्। अनयोः प्रत्याहारार्थमस्ति। नच महिं प्रति ङित्वादनयितुमित्यभिप्रायः॥२१५४॥

## २१५५॥ लः परस्मैपदम्॥ १।४।९९॥ ५

लादेशाः परस्मैपदसंज्ञाः स्युरिति॥ लइति। लकार[illegible]स्य स्थान आदेशानां परस्मैपदमिति संज्ञा तथाप्यग्रिमसूत्रेणापवादः॥२१५५॥५

## २१५६ तङानावात्मनेपदम्॥ १।४।१००॥ ६ ॥

तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसंज्ञापवाद इति। तङिति। तङ् प्रत्याहारश्च शा[illegible]नच् (आन) कानच् (आन) शानच् कानचौ उभावपि आन प्रत्ययौ तौ चैतेषामात्मनेपदमिति संज्ञा स्यात्। लिटः कानज्वा ३।२।१०६ क्वसुश्च ३।२।१०७ इह भूतसामान्ये छंदसि लिट् तस्य विधीयमानौ क्वसुकानचावपि छांदसाविति त्रिमुनिमतं। कवयस्तु बहुलं प्रयुंजते। तं तस्थिवांसं नगरोपकंठे इति। श्रेयांसि सर्वाण्यधि[illegible] जग्मुषस्ते इत्यादि॥ लटः शतृशानचावप्रथमासमानाधिकरणे। ३।२।१२४। अप्रथमांतेन सामानाधिकरण्ये सतीत्यर्थः। शबादि। पचंतं चैत्रं पश्य इति तयोर्व्याख्यानात्। पूर्वसंज्ञायाः "लः परस्मैपदं" मित्यस्याऽपवादोयम्। अत एव तिबादीनां नवसंख्यकानां परस्मैपदमितिसंज्ञा। त आताम् इत्या[illegible]द्ययं तङ् प्रत्याहारस्तस्य च शानच्कानच् एतयोश्चात्मनेपदमितिसंज्ञा स्यात्॥ ६॥

## २१५७॥ अनुदात्तङित आत्मनेपदम्॥ १।३।१२॥ ७

अनुदात्तेतः उपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मने पदं स्यात्। इति। अनुदात्त इति। यत्र धातोर्मध्यादनुदात्त इत् स्यात्तस्परेऽचो पदेशे यत्परे ङ् इत्स्यात् तदंत धातोः परे लकारस्थान आत्मनेपदसंज्ञकाः प्रत्ययाः स्युरित्यर्थः॥ अत्रानुदात्तेदयमेकः प्रकारः। ङित्वस्य चद्वौ प्रकारौ स्याताम्। धातुपाठे ये ङित् धातवस्ते। सूत्रे च " धातोरेकाचो हलादेः क्रियासमभिहारे यङ्"। ३।१।२२। पौनः पुन्यं भृशार्थश्च क्रियासमभिहार[illegible]स्मिन् द्योत्ये यङ् स्यादिति यङन्तप्रक्रियायां प्रत्ययाः कथिताः स्युस्तदन्ता ये धातवस्ते चैवं त्रिप्रकारकाणां धातूनां परे लकारस्थान आत्मने

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

पदप्रत्ययाः स्युरित्यर्थः। धातुपाठे ये धातवो भगवता पाणिनिना कथितास्तेषां कार्यविशेषानुरोधेन १ भ्वादयः। २ अदादयः ३ जुहोत्यादयः ४ दिवादयः ५ स्वादयः ६ तुदादयः ७ रुधादयः ८ तनादयः ९ क्र्यादयः १० चुरादयः। एते दशगणास्तेषां मध्ये धातोः परे इतः कथितास्ते व्यान्विभुस्सन्तु तेषामुदात्तादयः स्वराश्च तेषां धातूनामंगानामप्युदात्तादयःस्वरास्तत्र तत्र कथिताः स्युः॥ ७॥

## २१५८॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ १।३।७२॥ ८

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले। इति॥ स्वरित इति। यस्य धातोर्मध्यात् स्वरित इत्स्यात् यस्य धातोर्मध्ये ञकार इत् स्यात्तस्य क्रियायाः फलं यदा कर्तारमुद्दिश्य वर्तते तदा तत्परे लकारस्थाने आत्मनेपदप्रत्ययः स्यादित्यर्थः। अन्यान्यपि आत्मनेपदानां निमित्तानि तेषां विवेचनमग्रे भविष्यति॥ ८॥

## २१५९॥ शेषात्कर्तरि परस्मैपदम्॥ १।३।७८॥ ९॥

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्। इति। कर्तुरर्थं स्फुटीकर्तुं कर्तरिप्रयोगे परस्मैप्रत्ययाः स्युरित्यर्थः। स्वरितेद्भ्यां ञिद्भ्यां चोऽसति कर्त्रभिप्राये कर्तारमुद्दिश्य क्रियाफलाभावे कर्तरि परस्मैप्रत्ययाः स्युरित्यर्थः। धातुरनुदात्तेच्चेद्वा ङित्। अनुदात्तेद्वा तस्य कोप्यन्यदिदस्तु वा न चेत्तर्हि तत्र कर्तरि परस्मैप्रत्ययाः स्युरित्यर्थः। कर्तरि परस्मैपदमित्युक्तं तेनेत्थं बोद्धव्यं परस्मैप्रत्ययानां यद्यपि धातुश्चेत्तथापि कर्मणि वा भावे कर्मणो वा क्रियायाः केवलभावस्तस्यार्थः स्पष्टः कर्तव्यश्चेत्तत्र परस्मैप्रत्यया न स्युरात्मनेपदिनः प्रत्यया एव स्युरिति भावः। आत्मनेपदनिमित्तादात्मनेपदप्रत्ययाः स्युः॥ ९॥ ।अथ प्रत्ययानां विभागास्ते यथा।

## २१६०॥ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः॥ १।४।१०१॥ १०॥

तिङः उभयपदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युरिति। तिङां परस्मैचात्मने तयोरुभयपदयोर्ये नव नवाः प्रत्ययास्तेषां क्रमात्प्रथममध्यमोत्तमाः पुरुष इति संज्ञाः स्युरित्यर्थः॥ १०॥

## ॥२१६१॥ तान्येकवचनद्विवचनबहुवचनान्येकशः॥ १।४।१०२॥ ११॥

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्युरिति॥ द्व्येकयोर्द्विवचनैकवचने।१।४।२२। बहुषु बहुवचनम्।१।४।२१।इ-तितत्र व्याख्यातमथेदानीं प्रत्ययानां विभागास्तेयथा॥

| परस्मैपदम्॥ | एकवचनं | द्विव॰ | बहुव॰ | आत्मनेपदम्॥ | एकव॰ | द्विव॰ | बहुव॰ |
|---|---|---|---|---|---|---|---|
| प्रथमपु॰ | ति (प्) | तस् | झि। | प्रथमपु॰ | त | आताम् | झ। |
| मध्यमपु॰ | सि (प्) | थस् | थ। | मध्यमपु॰ | थास् | आथाम् | ध्वम्। |
| उत्तमपु॰ | मि (प्) | वस्। | मस्। | उत्तमपु॰ | इ (ट्) | वहि | महि (ङ्) |

एतेषां मध्ये प् इत् स्यादत एव तिप् (ति) सिप् (सि) मिप् (मि) एते पित् संज्ञकाः स्युरित्यर्थः। अर्थाद्वितरे अपित् संज्ञकाः स्युरिति विज्ञेयम्। असंयो-गाल्लिट् कित् १।२।५ असंयोगात्परो पिल्लिट् कित् स्यात्। सार्वधातुकमपित् १।२।४। आसां संज्ञानां विनयोगं मग्रिमसूत्रेषु भविष्यति॥११॥ प्रथम मध्यमोत्तमानां पुरुषसंज्ञकानां प्रयोगसंबंधीनि सूत्राणि॥ ॥२१६२॥ युष्मद्यु-

पपदे समानाधिकरणे स्थानिन्यपि मध्यमः॥१।४।१०५॥१२॥

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यादिति॥ तिङिति। षट् कारकाणि पुरा कथितानि तेषां मध्ये कर्ता च कर्मैते द्वे कारके तिङ्प्रत्ययानां वाचके स्याताम्। तेषां युष्मदिदं तिङ्-वाच्यकारकं चेत् (यदि कर्तरि प्रयोगे सति युष्मच्छब्दोऽयं तस्य कर्ता, कर्मणि प्रयोगे तस्य कर्म चेत्तदा तत्र मध्यमपुरुषं योजयेत्। स युष्मच्छब्दो वाक्ये प्रयुज्यमानो वाऽप्रयुज्यमानोऽस्तु तद्वदर्थो ज्ञेयः॥ सूत्रार्थस्तु। युष्मदि-दमुपपदं तिङ्समानाधिकरणं (तिङः सकाशाद्यस्य बोधः स्यात्तस्यैव बोधो युष्मच्छब्दाद्भवितुं शक्यश्चेत्तदा मध्यमपुरुषं योजयेत्। युष्मच्छब्दोऽयं स्थानी नाम गुप्तश्चेत्तर्ह्यपि। इति सूत्राशयः॥ १२॥

२१६३॥ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च॥१।४।१०६।१३

मन्यधातुरूपपदं यस्य धातोस्तस्मिन् प्रकृतिभूते सति मध्यमः स्यात्परिहासे। मन्यतेस्तु उत्तमः स्यात्स चैकार्थस्य वाचकः।इ-ति॥ मन्य इति। प्रकृतिभूतो मुख्यः कोपि धातुस्तं प्रति मन्य मन ज्ञाने दिवादि॰ धातुरिदमुपपदं स्यात्तदा परिहासे क्रीडायां प्रकृतिभूते धातोः परे मध्यमपुरु

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ष प्रत्ययः स्यात्। एकवचनेति। एकवचनप्रत्ययान्त इत्यर्थः। सूत्रे उपपदं तस्यार्थः। उपोच्चारितं पदं प्रादिसमासः। प्रत्ययादिविधायकसूत्रे सप्तम्यंतपदेन निर्दिश्यमानं पदं। यथा कर्मण्यण् इत्यादौ कर्मणीति सप्तम्यंतं पदं अण् प्रत्ययविधाने उपपदमित्यर्थः॥ १३॥ ॥ २१६४॥ अस्मद्युत्तमः॥ १।४।१०७॥ (१४) तथाभूते ऽस्मद्युत्तमः स्यादिति।

अस्मच्छब्दोयं तथाभूतः (तिङ्वाच्य कारकवाची अप्रयुज्यमाने सत्यपि धातोः परे उत्तमपुरुष प्रत्ययः स्यादित्यर्थः॥ १४॥ ॥ २१६५॥ शेषे प्रथमः॥ १। ४।१०८॥ (१५) मध्यमोत्तमयोर विषये प्रथमः स्यादिति॥ स्पष्टम्। भू सत्तायाम्। तत्रादौ कर्तरि रूपाणि। भू धातुस्त्व कर्मकः। इच्छापि नास्ति। अतो ऽस्यपरे कर्तरि भावे वा लिट्। परं संप्रति कर्तरि विवक्षाया मत एव परस्मैपदी प्रत्ययः। प्रथमतः तिप् प्रत्यये परे सति भू ति इति स्थिते परं परकार्यायादौ संज्ञा। ॥२१६६॥ तिङ्शित् सार्वधातुकम्॥ ३।४।११३॥ (१६) ॥ तिङः शितश्च धा(त्व)धिकारोक्ता एतत् संज्ञाः स्युरिति॥ तिङ् प्रत्याहारस्थाः सर्वे प्रत्ययाश्च धातोः कर्मणः समान कर्तृकादिच्छायां वेति ३।१।७ तृतीयाध्यायस्थाः सर्वे शकारेत् प्रत्ययाः सार्वधातुक संज्ञाः स्युरित्यर्थः॥ १६॥

२१६७॥ कर्तरि शप्॥ ३।१।६८॥ (१७) कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात्। शपावितौ। इति। शप् (अ) अयं विकरण संज्ञक प्रत्ययः स्यादित्यर्थः। अत्र शकार पकारावितौ। अतः शकारार्थमयं सार्वधातुकः पित्संज्ञकोपि स्यात्। भू अ ति। इति स्थिते परा कारार्थे 'भू' अस्यांग संज्ञा। उक्तं च भगवता पाणिनिना "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।१।४।१३। यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परे ऽङ्ग संज्ञं स्यादित्यर्थः॥ १७॥ २१६८ सार्वधातुकार्धधातुकयोः॥ ७।३।८४॥ (१८) अनयोः परयोरिगंतांगस्य गुणः स्यात्। अवादेशः। भवति भवतः। इति। अनयोरिति। सार्वधातुके आर्धधातुके प्रत्यये परे सति इगंतांगस्य गुणः स्यात्। आर्धधातुकं शेषः ३।४।११४। इति सूत्रेणार्धधातुक इति संज्ञा। 'भो अ ति' इति स्थिते अ-

"joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

वादेशः। "एचोऽयवायावः।६।१।७८।६। एचः क्रमादय् [redacted] अव् आय् आव् एते स्युरचि। इतिसूत्रव्याख्यानोक्तत्वात् ओस्थाने अवादेशः। भवति। तथैव भवतः। परे "झि"प्रत्यये सति॥१८॥

२१६९॥ झोऽन्तः।७।१।३। (१९) प्रत्ययावयवस्य झस्यान्तादेशः स्यात्। अतो गुणे। भवंति भवसि भवथः भवथ। इति। प्रत्ययइति। प्रत्ययस्यावयवो झकारस्तत्र 'अन्त्' इत्यादेशः स्यात्। तदा तत्र झि स्थाने अंति इत्यादेशो भूत्वा 'भू अ अंति' इतिस्थिते पूर्ववद्गुणः अवादेशश्च 'भव अंति' इतिस्थिते "अतोगुणे ६।१।९७ (१९) इतिसूत्रेण गुणश्चावादेश इति। परे मिप् सति 'भू अ मि' इतिस्थिते गुणश्चावादेशः। 'भव मि' इतिस्थिते। अत्र 'मि' प्रत्ययार्थे 'भव' अस्यांग संज्ञा॥१९॥

॥२१७०॥ अतो दीर्घो यञि।७।३।१०१॥ (२०)॥ अतोंगस्य दीर्घः स्याद् यञादौ सार्वधातुके परे। भवामि भवावः भवामः। स भवति तौ भवतः। ते भवंति। त्वं भवसि। युवां भवथः। यूयं भवथ। अहं भवामि। आवां भवावः। वयं भवामः। +एहि मन्ये ओदनं भोक्ष्यसे इति भुक्तः सोऽतिथिभिः। एतवमेतथा मन्ये ओदनं भोक्ष्ये थे भोक्ष्यध्वे॥ भोक्ष्ये भोक्ष्यावहे भोक्ष्यामहे। मन्यसे मन्येथे मन्यध्वे। इत्यादिरर्थः। युष्मद्युपपदे इत्याद्यनुवर्तते। तेनेह न॥ एतु भवान् मन्यते ओदनं भोक्ष्ये इति भुक्तः सोऽतिथिभिः। प्रहासे किम्। यथार्थकथने मा भूत्। एहि मन्यसे ओदनं भोक्ष्ये इति भुक्तः सोऽतिथिभिरित्यादि॥ अत इति। यञादौ सार्वधातुके परे आकारांतांगस्य दीर्घः स्यात्। भवामि तथैव भवावः। भवामः। उदाहरणं। प्रथमपुरुषैकवचने सः भवति तौ भवतः। ते भवंति। इत्यादि। क्रियापदानां लिंगभेदाभावादत एव त्रिषुलिंगेषु समानानि रूपाणि स्युरित्यर्थः। मन्ये न्य इत्युपपदं तस्योदाहरणानि। एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोऽतिथिभिरित्यत्र भुज धातुः प्रकृति भूतो मुख्यश्च मन्यधातुरूपपदमत स्तस्यार्थोऽहं भोक्ष्ये इति। अनेनैव प्रकारेण त्वं मन्यसे तर्हि त्वमेहि (आगच्छ) अतिथिभिः स ओदनो भुक्तः। ओदनः पु॰ उन्द क्लेदे रुधादि॰ पर॰ अक॰ सेट्। उनत्ति औं दीत्। युच् नलोपो गुणश्च। भक्तः (भात इति भाषायां) स्विन्नान्नमित्यर्थः। इत्याद्यनुक्रमेणार्थो विज्ञेयः॥ भुक्तः सोऽतिथिभिः। अ

+ एहीति इण् गतौ णिल् अदादि॰ पर॰ सक॰ अनिट्। एति ऐषीत्। इति। शि॰

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तिथिरिति। अतिथिः। पु॰ अतति गच्छति न तिष्ठति। अत प्रापणे सातत्ये गतौ च भ्वादि॰ पर॰ सक॰ सेट्। अतति आतीत् क्ते अतितः। इथिन्। अध्वयोगेनागंतुको गृहागतः, विषयेच तस्यैं द्रियेषु संसर्गमात्रकाल एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुमीयत इति शब्दस्तोमे तारानाथ तर्कवाचस्पतिः।

भुक्तः सोऽतिथिभिरित्यर्थे सति भक्षणार्थो यो धातुः स उत्तमपुरुषवाचकश्च मन्यधातुस्तु मध्यमपुरुषवाचकः परं परिहासे क्रीडायां सत्यां 'एहि मन्ये' अत्रोदाहरणे भक्षणार्थ धातुर्मध्यमपुरुषे योजितः। मन्ये इद मुत्तमपुरुषस्यैकवचनम्॥ युष्मदिति। युष्मद्युपपदे प्रयुज्यमाने वाऽप्रयुज्यमाने सति, इत्यनुवृत्तिः स्यादतो 'भवान्' इद सुपपदे सति तद्वत्प्रयोगो न स्यात्। अनुवृत्तिर्नाम पूर्वसूत्रोपात्तपदादीनामुत्तरत्र सूत्रेष्वनुकर्षणरूपोऽध्याहारोऽनुवृत्तिरिति वैयाकरणाः। अनु वृत वर्तने भ्वा॰ आत्म॰ लुङि लृङि लृङि च उभ॰ अक॰ सेट्। वर्तते अवृतत् अवर्तिष्ट वृत्स्यति वर्तिष्यते लृकावेट्। किन्न्वत्यय। 'एतु भवान् मन्यते ओदनं भोक्ष्ये इति' अहमोदनं भोक्ष्ये इति भवान् मन्यते तर्हि आगच्छतु भवानिति। अत्र भोक्ष्यते न मध्यमपुरुषः। मन्यतेऽत्र नोत्तमैकवचनम्॥ प्रहासे किम्। प्रहासे परिहासे किमिति चेत्तर्हि यथार्थकथने माभूत्। यथार्थे त्यव्ययं, अर्थमनतिक्रम्य अव्ययीभावः। अर्थस्याव्यभिचारः सत्यत्वमित्यर्थः। सत्यकथने तद्वत्प्रयोगाऽसंभवादित्यर्थः। 'एहि मन्ये न्यसे' इत्ययमेव प्रयोग इति लङ्विवरणं॥२०॥

अथेदानीं लिड्विवरणं क्रियते॥ २१७१॥ परोक्षे लिट्॥

३।२।११५॥ (२१)॥ भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लस्य तिबादयः। इति॥ भूत इति। भूतः गतः परं नानद्यतनः परोक्षः। परोक्ष इत्यव्ययं अक्ष्णः परमं अव्य॰ सुट् निपातनात्। अप्रत्यक्षः अर्शआद्यच्। तद्विषये त्रिलिंगः। इति शब्द॰ तारा॰। तादृशो योऽर्थः प्रकारस्तस्मिन्वृत्तिर्यस्य धातोः, तस्य बोधो यस्माद्धातोः स्यात्तत्परे लिट् स्यादित्यर्थः। इकारटकारावितौ गत्वा 'लस्य तिबादयः' इति, लकारस्थाने तिप् तस् इत्यादय आदेशा आगताः परं अन्यस्मिन् भिन्ने इत्यर्थे परशब्द इति त्रिलिंगः। पृ भावे अप् कर्तरि अच् वा। पृ पालने पूर्तौ च क्र्या॰ पर॰ सक॰ सेट्। पृणाति अपारीत्। पूर्तौ चुरा॰ उभ॰ सक॰ सेट्। पारयति ते अपीपरत् त। इति परशब्दविवरणम्। शब्द॰ तारानाथः॥ २१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

२१७२॥ लिट् च॥३।४।११५॥ (२२)॥ लिडादेश स्तिङार्धधातुकसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः। तेन शबादयो नेति॥ लिडिति। "तिङ्शित् सार्वधातुकम्" ३।४।११३।(२१६६) तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युरित्यनेन तिङां सार्वधातुकसंज्ञा प्राप्ता। सत्यमेतत् परं लिट्प्रत्ययानां ये तिबादयस्तिङादेशाः स्युस्तेषां प्रस्तुत (प्रकरणप्राप्त प्रासंगिक) निषेधाद् "आर्धधातुकसंज्ञैव स्यान्न सार्वधातुकसंज्ञेति" विज्ञेयम्। तेन शबादयो नेत्यत एव परे सार्वधातुकप्रत्ययाभावाल्लिट्काले "कर्तरि शप्" ३।१।६८ (२१६७) कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यादित्यत्र 'शप्' (अ) इत्यादिविकरणं न स्यादिति विज्ञेयम्॥ भिन्नभिन्नगणस्थ क्रियापदानां भिन्नभिन्नविकरणा[redacted]स्ते तत्र तत्र बोधिताः स्युः॥ "कर्तरि शप् ३।१।६८। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च। ३।१।८२ स्तंभ्[redacted]वादयः [redacted]लारः सौत्राः सर्वे रोधनार्था इत्येके। माधवस्तु प्रथमतृतीयौ स्तंभार्थौ द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इत्याहेति। एवमार्धधातुके परे सति तेषां सर्वेषां प्राप्त्यसंभवादिति विज्ञेयम्॥ २२॥

लिट्स्थाने के तिप्तस् इत्यादय आदेशास्तेषां परस्मैपदे पुनरादेशा भवंतीत्यत्र सूत्रम्॥ २१७३॥ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः॥३।४।८२॥ (२३)॥ लिटस्तिबादीनां नवानां णलादयो नव स्युः। भू अ इति स्थिते। इति॥ लिडिति। लिट्स्थानस्था[redacted]नां तिबादीनां नवानां परस्मैपदे णल्। अतुस्। उस्। थल्। अथुस्। अ। णल्। व। म। इति नव आदेशाः स्युः। ते पुनः णकारलकारावितौ। तत्र णित्वार्थे णकारः "अचो ञ्णिति" ७।२।११५ (२५४) ञिति णिति च परेऽजंतांगस्य वृद्धिरिति। वृद्ध्यर्थः। लकारोऽयं "लिति" ६।१।१९३ (३६७६) प्रत्ययात्पूर्वमुदात्तमित्यनेन प्रत्ययात् प्राग[redacted]चः उदात्तत्वमानयितुं स्यादित्याकूतम्। प्रत्ययाः॥

| | एकवचनं। | द्विवचनं। | बहुवचनं। |
|---|---|---|---|
| प्रथमपुरुषः | [ण्] अ [ल्] | अतुस् | उस्। |
| मध्यमपु॰ | थ [ल्] | अथुस् | अ। |
| उत्तमपु॰ | [ण्] अ [ल्] | व | म। |

भू अ इति स्थिते। सूत्रम्॥ २१७४॥ भुवो वुग्लुङ्लिटोः॥६।४।८८॥ (२४) भुवः वुक् आगमः स्यात् लुङ्लिटोः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

अचि। नित्यत्वाद्वुक् गुणवृद्धी बाधते। इति॥ भुव इति। परे लुङ्लिटो
श्चेतत् संबंधिन्यचि सति भू धातो र्वुक् 'व' आगमः स्यात्। कित्वादंते 'भूव् अ'
इति स्थिते। अत्र 'अ' अस्मिन्नार्धधातुके प्रत्यये परे सति "सार्वधातुकार्धधा
तुकयोः" ७।३।८४(२१६८) अनयोः परयोरिगंतांगस्य गुण इत्यनेन 'भू' अस्य इगंतांग
स्य गुणो भवितुमर्हस्तथैव स 'अ'(णल्) णित् प्रत्ययोयं परोस्त्यतएव "अचोञ्णि
ति" ७।२।११५(२५४) ञिति णिति च परेऽजंतांगस्य वृद्धिरित्यनेन ऊकारस्य वृद्धिः,
परं वुक् वकारः अयमागमो नित्यः कृतेऽपि भवत्यकृतेऽपि भवति। अत एव 'भू'
इति रूपे सत्यपि तस्य प्राप्तिर्गुणः, स भूत्वा 'भो' वृद्धिर्वा भूत्वा 'भौ' इतिरूपे
सत्यपि तस्य प्राप्तिरस्त्येव तस्मात्तस्य नित्यत्वम्। नित्यत्वाद्गुणवृद्धी बाध
तं इति। वुक्(व्) अस्य नित्यत्वाद्गुणवृद्धी द परकार्यं तस्यापि बाधः॥ "य
दागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यंते" (यस्यागमाः कर्तव्यास्ते त
द्गुणा भवंति, तेषामुच्चारणादागमानामपि ग्रहणं) इत्यनया परिभाषया
आगमेन सह भूव्' अस्य धातुत्वम्। तत्रागमोनाम प्रकृतिप्र त्य
यानुपघातेनागच्छति प्राप्नोतीत्यर्थः। प्रकृतिप्रत्ययानुपघातेन तन्म
ध्यादागं तरीडादाविति वैयाकरणाः। द्वित्व प्रकरणं परे॥ २४॥

२१७५॥ एकाचो द्वे प्रथमस्य॥ ६।१।१॥(२५) ॥ यस्मिन्
एकाच् तादृशो वर्णसमुदायः अर्थादेक एवाच् ,परं तस्य पूर्वं पश्चाद्वा हलि सति
तेन हला सह यः अच् स एकाच् संज्ञक इति विज्ञेयः। प्रथमत एकाच् इत्य
स्य द्विवार प्रयोगः स्यात्। इदं परं चेद्वे अधिकार सूत्रे स्तः॥ २५॥

२१७६॥ अजादेर्द्वितीयस्य॥ ६।१।२॥(२६) इत्य
धिकृत्येति॥ आद्यचः परतो द्वितीयस्य एकाच स्तस्य द्विवार प्रयोगः
स्यात्। एवं द्वाभ्यां सूत्राभ्यामधिकार सिद्धिं कृत्वा॥ २६॥

२१७७॥ लिटि धातोरनभ्यासस्य॥ ६।१।८॥ (२७)
लिटि परेऽनभ्यासधातववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूताद
चः परस्य तु द्वितीयस्य। 'भूव् भूव् अ' इति स्थिते। इति॥ लिटीति। परे लि
टि प्रत्यये सति नास्त्यभ्यास आवृत्तिर्यस्य सोऽनभ्यासस्तादृशो यो धातुस्त
स्यावयवो यः प्रथम एकाच् तस्य द्विवार प्रयोगः स्यादित्यर्थः। प्रथमतः अ
द्यचि सति तत्परेऽन्य एकाच् चेत्तर्हि तस्य द्वितीयस्यैकाचो द्विवारः प्रयोगः स्यादि-

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्याकूतम्। "भूव् भूव् अ" इति स्थिते॥ अभ्यास संज्ञाया लक्षणं कर्तुं परसूत्रम् ॥२७॥

२१७८॥ पूर्वोऽभ्यासः॥६।१।४॥(२८) अत्र ये द्वे विहिते तयोः पूर्वोऽभ्यास संज्ञः स्यात्। इति॥ अत्रेति। अभ्यासस्यादिर्हल् शिष्यते। योऽत्र द्विवार प्रयोगः कथितस्तत्र प्रथमस्य पूर्वस्याभ्यास इति संज्ञा स्यात्। एवं यः पूर्वो भूव् तस्याभ्यास संज्ञा। धात्ववयवस्य द्विवारःप्रयोगस्तत्र द्वयोर्मध्यादेको नूतनश्चैकः प्रथमो मूलतोऽस्तीति न च वाच्यम्। द्वावेतौ नवीनौ, परं तयोर्मध्य आद्यो व्यारितः स एवाऽभ्यास इति विशेयम् ॥ २८॥

॥२१७९॥ हलादिः शेषः॥७।४।६०॥(२९) अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यंते, इति वलोपः॥ अभ्यास इति। अभ्यासस्यादिर्हल् शिष्यते। अन्य हलां लोपः स्यात्। आदिर्हल् यद्यभ्यासे न स्यात् स अजादिश्चेत्तर्हि पर हलां लोपः। इत्यं व लोपः। भू भूव् अ' इति स्थिते परे ॥२९॥

॥२१८०॥ ह्रस्वः॥७।४।५९॥(३०) अभ्यासस्याचो ह्रस्वः स्यात्। इति। अभ्यासस्य नाम पूर्वस्याचो ह्रस्वः। 'भु भूव् अ' इति स्थिते, परं विशेष सूत्रं तद्यथा ॥ ३०॥

२१८१॥ भवतेरः॥७।४।७३॥(३१)॥ भवतेरभ्यासस्योकारस्य अः स्याल्लिटि। इति। भवतेरिति। परे लिटि सति भू धातोरभ्यासस्योकारस्थाने अः स्यात्। 'भ भूव् अ' इति स्थिते, परे ॥ ३१॥

॥२१८२॥ अभ्यासे चर्च ॥८।४।५४॥(३२) अभ्यासे झलां चरः स्युर्जशश्च। झषां जशः। खयां चरः। तत्रापि प्रकृति जशां प्रकृति जशः। प्रकृति चरां प्रकृतिचर इति विवेक आन्तरतम्यात्। इति॥ अभ्यास इति। अभ्यासस्य झलां स्थाने जश् चरश्च (जश्-चर्) स्युः। ते यथा। झषां स्थाने जशः (जश्) खयां स्थाने खयः (खय्) तत्रापि प्रकृत्या स्युरिति विवेकः याथार्थ्येन वस्तु स्वरूपावधारणं। आन्तरतम्यादज्ञोयम्। अंतरतमस्यात्यंत सादृशस्य भावः व्यञ्। सौसादृश्यमित्यर्थः। 'ब भूव् अ' अर्थात् 'बभूव' इति रूप सिद्धं परमत्र शंका ॥ ३२॥

॥२१८३॥ असिद्धवदत्राभात्॥६।४।२२॥(३३) इत ऊर्ध्वमापाद परिसमाप्तेराभीयम्। समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्। इति लुकोऽसिद्धत्वादुवङि प्राप्ते॥ भुवो वुग्लुङ्लिटोः ॥ वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ॥ इति वार्तिकं॥ बभूव बभूवतुः बभूवुः। इति॥

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

इतइति। इतोऽस्मात् सूत्रादारभ्य (६।४।२२) पादसमाप्तिपर्यन्तं "ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि ॥६।४।१७५। यत् कार्यं तदाभीय कार्यम्॥ 'भस्य', "ध्वसोरेद्धावभ्यासलोपश्च" ६।४।११९॥ सूत्रादस्मादारभ्य पादसमाप्ति १७५ पर्यन्तं भस्थानस्थ कार्यं कथितं तद्धाधिकारसंज्ञकं विज्ञेयम्। प्रस्तुतं प्रकरण प्राप्तं "असिद्धवदत्राभादिति सूत्रं ६।४।२२। तस्मादारभ्य 'आभात्' अर्थाद्भाधिकारमभिव्याप्य भाधिकारस्य समाप्तिपर्यन्तं यत् प्रकरणं तदाभं स्यादित्यर्थः। आभे भवमाभीयं आभप्रकरणे यत्कथितं तदाभीय मिति प्रकरणार्थः॥ प्रकरणंनाम एकार्थप्रतिपादक ग्रंथांशः। प्र-कृ-ल्युट्॥ एकाश्रयेणैकेनैव निमित्तेनैकस्यैव निमित्तार्थयान्यनेकानिकार्याणि तानि समानाश्रय कार्याणि। समानाश्रयं यदाभीयकार्यं तद्यदा कर्तव्यं तदा प्राग्जातं समानाश्रयमाभीयकार्यं तदसिद्धं स्यात्।" समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यादितिकौ.। 'बभूव् अ' अत्र 'भुवोवुग्लुङ्लिटोः ६।४।८८(२१७४) भुवो वुगागमः स्यात् लुङ्लिटोरचि' इत्यनेन परस्मैः लिट् संबंधी 'अ' अस्याचोर्थे भू धातो र्वुक् (व्) आगमः, इदमाभीयकार्यं स्यात् तन्निमित्तेन भू धातोः परे अचि सति "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" ६।४।७७(२७१) अत्र स्य धातु शब्दार्थे ऊकारस्य उवङ् (उव) आदेशः इदमप्याभीयकार्यं स्यात्। अत एवेमे द्वे समानाश्रय कार्ये स्तः। अत उवङ् कर्तव्ये सति तस्य वुक् असिद्धवत्स्यात्। 'बभू अ' इदमेव दृश्यते। इति वुकोऽसिद्धत्वा दुवङ् प्राप्तं इति। वुकः अस्यासिद्धत्वात् परस्याकारार्थे ऊकारस्य उवङ् प्राप्तिस्तस्मात् 'बभूव् व् अ' एतत्प्रकारकं विलक्षण रूपं भवति, परं शंका समाधानम्। वुग्युटावुवङ्यणोः सिद्धौ वक्तव्या विति वार्तिकम्। उक्तानुक्त दुरुक्तार्थ व्यक्तकारि तु वार्तिकमिति लक्षणात्। उवङ् वा यण् कर्तव्ये सति अनुक्रमेण वुक् युट् च। अस्यार्थे "दीडो युडचि क्ङिति ६।४।६३(२५०७) दीडः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्। इत्यनेन सिद्धं नासिद्धमिति ज्ञेयम्। अतएव 'बभूव् अ' अत्र ऊश्च 'अ' एतयोर्मध्ये सिद्धत्वात् व् इदं व्यवधानमागतं तस्मादुवङः प्राप्तेरभावात् बभूव। अतुस् उस् प्रत्ययोस्तद्वत्कार्यं भूत्वा बभूवतुः बभूवुः॥ २२॥

परे थलि सति (थ) भूथ इति स्थिते परम्॥ —

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

२१८४॥ आर्धधातुकस्येड्वलादेः॥७।२।३५॥ (३४)॥

वलादेरार्धधातुकस्येडागमः स्यादिति॥ वलादेरिति। वल् प्रत्याहारवर्णः आरंभे यस्य स आर्धधातुकप्रत्ययस्तत् पूर्वं इट् (इ) आगमः स्यात्। लिटः स्थाने तिङ् प्रत्यया आर्धधातुकाः संत्येव। तेषां स्थाने णलादयो नव प्रत्यया इमे पि स्थानिवद्भावेनार्धधातुकाः स्युरेव। अत एव थल् अस्यार्धधातुकस्यायमिडागमः। 'भू इथ' इतिस्थिते परे पूर्ववत् 'भूव् इथ', 'भूव् भूव् इथ' भू भूव् इथ' भु भूव् इथ भ भूव् इथ' अनंतरं बभूव् इथ। इत्थं बभूविथ। अथुस् प्रत्यये बभूवथुः। परे बभूव॥ बभूव बभूविव बभूविम। इति। भू धातोः परस्मैपदे लिट् प्रत्ययास्ते यथा॥ प्रथम पुरुष एकवचने बभूव। द्विवचने बभूवतुः। बहुवचने बभूवुः। मध्यम पुरुष एकवचने बभूविथ बभूवथुः द्विवचने। बहुवचने बभूव। उत्तम पुरुष एकवचने बभूव। द्विवचने बभूविव। बहुवचने बभूविम। इति लिड्विवरणं॥ ३४॥

अथातो लुट्प्रत्ययविवरणम्॥ २१८५॥ अनद्यतने लुट्[+]॥ ३।३।१५॥ (३५) भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात्। इति। भविष्यदिति। अनद्यतनो नाम अस्मिन् दिने न किंतु श्वः स्तनः भाविदिनस्थायी भविष्यदित्यर्थः। तदर्थे धातोः परे लुट् प्रत्ययः स्यात्। भू लुट् इतिस्थिते॥ ३५॥ २१८६॥ स्यतासी लृलुटोः॥ ३।१।३३॥ (३६)॥ लृ इति लृङ्-लृटोर्ग्रहणम्। धातोः स्यतासी एतौ प्रत्ययौ स्तः लृलुटोः परतः। शबाद्यपवादः। इति। लृ इति॥ लृ इत्यस्योच्चारणाल्लृङ्-लृटोर्द्वयोरपि ग्रहणं स्यात्। परे लृङि-लृटि सति धातोः परे 'स्य' प्रत्ययः स्यात् परे लुटि सति धातोः परे तासि (तास्) प्रत्ययः स्यात्। एते शबादि विकरणानां अपवाद रूपविकरण संज्ञक प्रत्ययाः स्युः। प्रस्तुतं लुट् कार्यं अत एवात्र 'स्य तासि' अत्र स्यं तासि (तास्) विकरणम्। 'भू तास् लुट्'। इतिस्थिते॥ ३६॥

२१८७॥ आर्धधातुकं शेषः॥ ३।४।११४॥ (३७)

---

+ गतमध्यरात्रिरागतमध्यरात्रिपर्यंतं यः कालः स चाद्यतनः। तदारभ्य अनंतरं भविता स तु वा नद्यतनः पश्चात्क्षिप्यमयमेवार्थः॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

तिङ्शिद्भ्योऽन्यो धातोरितिविहितः प्रत्यय एतत्संज्ञः स्यात् इट्। + धात्वधिकारोक्त इति पाठान्तरं॥ तिङिति। तिङ्प्रत्ययश्च शकारेत्प्रत्यय एतद्व्यतिरिक्तो यः 'धातोः' अधिकारे अर्थात्तृतीयाध्याये कथितः प्रत्ययस्तस्यार्धधातुक इति संज्ञा स्यात्। अतः स्य, तास् चैतौ विकरणौ आर्धधातुक संज्ञकौ स्तः। "सार्वधातुकार्धधातुकयोः ७।३।८४(२१६८) अनयोः परयोरिगंतांगस्य गुणः" इत्यनेन 'भू' अ-[illegible]स्य इगंतांगस्य गुणः। 'भो तास् तिप्' इतिस्थिते "आर्धधातुकस्येड्वलादेः ७।२।३५(२१८४) वलादेरार्धधातुकस्येडागमः" इत्यनेन 'इट्' आगमः। 'भो इतास् तिप्' इत्थं भवितास् तिप् इतिस्थिते॥ ३७॥

२१८८॥ लुटः प्रथमस्य डारौरसः॥२।४।८५॥(३८)

डारौरसः एते क्रमात्स्युरिति। लुटः स्थाने प्रथमपुरुषस्य तिप् तस् झि एते प्रत्ययास्तेषां स्थाने क्रमेण डा(आ) रौ रस् एत आदेशाः स्युः। "चुटू १।३।७।(२१८९) प्रत्ययाद्यौ चुटू इतौ स्त इति जस्येतु संज्ञा या" मित्यनेन डकार इत्। इतरे प्रत्यया लुटः संति त एवेत्यर्थः॥ लुट्। परस्मैपदम्। परस्मै परोद्देशेन पदं फलबोधनं यस्मात्। व्याकरणोक्तास्तिबादयो नव। स्वरितेतः ञितश्च धातोरुत्तर तिबादिभिर्नवभिर्हि परार्थमेव फलं बाध्यत इति परस्मैपदस्यार्थः॥ विकरणं तास् (आर्धधातुकं) प्रत्ययः सार्वधातुकः। सर्वधातूनव्याप्नोति ठक्। व्याकरणोक्त सर्वधातु प्रकृतिक तिङादौ प्रत्यय इति॥ प्रत्ययांतास्थितिः। प्रथमपुरुष एकवचने (ड्) आ। द्विवचने रौ। बहुवचने रस्॥ मध्यमपुरुषे एकवचने सि(प्) द्वि०व० थस्। ब०व० थ॥ उत्तमपुरुष एक०व० मि(प्) द्वि०व० वस्। ब०व० मस्। इति प्रत्ययाः॥ 'भवितास् ड् आ' इतिस्थिते। टेः ६।४।१४३(२१६) अनेन डितिपरे भस्य टेर्लोपः। अर्थात् डितिपरे सति भसंज्ञकस्य टेर्लोपः। इदानीमत्र यद्यपि भ संज्ञा नास्ति तर्हि 'डित्व सामर्थ्यात् अभस्यापि टेर्लोपः। इत्थं प्रत्ययस्य डित्वं तद्व्यर्थं मा भूदत एव न भसंज्ञकस्तादृशस्यापि टेर्डित्व सामर्थ्याल्लोपः। 'भवित् आ' इतिस्थिते, पराङ्कार प्रत्ययार्थं 'भवित्' विकरणांतस्यांग संज्ञा। तत्र स्थोपधा इकारो लघुस्तदा॥ ३८

२१८९॥ पुगंतस्य लघूपधस्य च॥७।३।८६॥(३९)

पुगंतस्य लघूपधस्य चांगस्येको गुणः स्यात् सार्वधातुकार्ध

---

+ उपधा। अंत्य वर्णात्पूर्व [illegible] र्णोपधा संज्ञक इति॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

धातुकयोः। येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः। भवित् आ अत्रेको गुणे प्राप्ते। इति॥ पुगंत इति। सार्वधातुके वाऽर्धधातुके प्रत्यये परे सति पुक्(प्) आगमान्त" अर्ति ह्री व्ली री क्नूयी क्ष्मा य्यातां पुङ्णौ" ७।३।३६(२५७०) इति। लघूपधं यदंगं वा तस्येकस्य गुणस्तस्मात् परो य 'आ' तस्य सार्वधातुकप्रत्ययार्थे 'भवित्' अस्य लघूपधांगस्येकारस्य गुण प्राप्तिरागता। परे सार्वधातुकार्धधातुकयोः प्रत्यये परे लघूपधांगस्येकस्य गुणः, परं, अव्यवहित पूर्वः व्यवधानरहितः साक्षात् संबद्धस्तादृश इक् क्वास्ति? यदि स चेत्तर्हि तस्यां गस्यांते स्थितः स्यान्न तस्योपधात्वम्। यदि नोपधात्वं तर्हि सूत्रस्य वैयर्थ्यान्नान्यत्र क्वापि चारिताथ्यं। अत एव 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति। यदेकस्य वर्णस्य स्थितित्वादेव परप्रत्ययश्च सदंगस्य इक् तयोर्मध्याद्व्यवधानं (द्रव्यांतरेण द्रव्यांतरस्याच्छादनं तिरोधानं तद्रहितमव्यवधानं रिक्तस्थलमिति निष्कर्षार्थः) तन्नाभूत्। अर्थादव श्यं व्यवधानं तिरोधानं (पडदा इति भाषायां) उत्पन्नं स्यात्। यो वर्णस्त्यक्तः निष्कासितस्तस्य मध्ये व्यवधानाभावात्। स परे सत्यपि, अर्थात् प्रत्ययात् प्रागे कस्मिन्वर्णे सति अंगस्येकस्य गुणः स्यात्। किंच सूत्रमिदं प्रमाणम्। तस्य वैयर्थ्यं नास्ति। 'तेन भिनत्तीत्यादावनेकव्यवहितस्येकः न गुणः' । इत्यनेन 'भिनद् ति' अत्र 'भिनद् इदं लघूपधांगं तत्र स्थः 'इ' अयं इक् परश्च 'ति' प्रत्ययः अनयोर्मध्ये 'न् अ द्' एते षामनेकवर्णानां व्यवधानत्वात् तस्येकस्य न गुणः। तद्वदन्यत्रापि विज्ञेयम्॥ अत्र लघूपधांगमित्युक्तं तत्र लघू या उपधा स एव इक् वर्णश्चेत्तर्हि गुणः। नान्यथा गुणः स्यादित्याकूतम्॥ इत्थं, 'भवित् आ' अत्र इकः गुणे प्राप्ते इति। परमयमिक् इडागमरूपस्तद् गुणस्य निषेधसूत्रं तद्यथा॥ ३९॥   ॥२१९०॥

दीधीवेवीटाम्॥१।१।६॥(४०)॥ दीधीवेव्योः इटश्च गुणवृद्धी न स्तः। भविता इति। 'दीधी वेवी' अनयोर्धात्वोश्चेडागमस्य न गुणवृद्धी अतो न गुणः। भविता। भू रौ। भूतास् रौ। भवितास् रौ। इति स्थिते॥ ४०॥

२१९१॥ तासस्त्योर्लोपः॥७।४।५०॥(४१)॥ तासेरस्तेश्च लोपः स्यात् सादौ प्रत्यये परे। इति। सकारादिप्रत्यये परे सति तासि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(तास्) अस्। धातू चानयो रंत्य सकारस्य लोपः स्यात्। पर सूत्रे 'भवितासि' शब्दस्य सिद्धिं कर्तुं सूत्रस्यास्य प्रयोजनम्। परं सरल क्रमार्थमिद मादौ लिखितम्॥ ५१॥ ॥२१९२॥ रिच॥७।४।५१॥ (४२)

रादौ प्रत्यये प्राग्वत्। तास् अस् अनयोः सकारस्य लोपः॥ भू धातुः लुट्। परस्मै पदम्। अनागामिनी रात्र्यनंतरं भावी भविता इत्यर्थः॥ प्र॰ पु॰ भविता भवितारौ भवितारः॥ म॰ पु॰ भवितासि भवितास्थः। भवितास्थ। उ॰ पु॰ भवितास्मि भवितास्वः। भवितास्मः॥ इति॥ ५१॥ अथ लृट् प्रत्ययाः॥ ॥२१९३॥ लृट् शेषे च॥३।३।१३॥ (४३)

भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां चेति॥ भविष्यदर्थे भाविनिकाले एतदर्थे यो धातुस्तत्परे लृट् प्रत्ययः स्यात्। भविष्यत् क्रिया उपपदं यस्य तादृशमन्यत् क्रियापदमस्तु वा नास्तु। लृटः स्थाने तिप् तस् झि एत एव प्रत्ययाः स्युः। झस्थाने तु 'अन्त्' स्य विकरणं, आर्धधातुकं इट्। "आदेश प्रत्यययोः" ८।३।५९ (२१२) इत्यनेन सकार स्थाने मूर्धन्यादेशः। षकार इत्यर्थः। भू धातुः लृट्। परस्मै पदं। स भविष्यतीति। प्र॰ पु॰ भविष्यति भविष्यतः भविष्यंति। म॰ पु॰ भविष्यसि भविष्यथः भविष्यथ। उ॰ पु॰ भविष्यामि भविष्यावः भविष्यामः। इति। उत्तमपुरुषे "अतो दीर्घो यञि ७।३।१०१ (२१७०) अतः अंगस्य दीर्घः स्यात् यञादौ सार्वधातुके परे" इत्यनेन भविष्यामीति दीर्घः॥ क्रियार्थायां क्रियायां असत्यां सत्यां चेति यो लुब्धा मुक्तं एतन्नोक्तं चेत्तर्हि न कापि क्षतिस्तथापि 'सत्याम्' एतेषां शब्दाना मनुवृत्तिः पूर्वत आगतात्तस्या वैकल्पिक ग्रहणार्थं सूत्रे शेषे च (अन्यत्रापि) इत्युक्तं तस्यायमर्थ विस्तारः। तस्योदाहरणं कौमुद्या मत एवात्र लिख्यते। करिष्यति अत्र नोपपदं, परं करिष्यामीति व्रजति (अहं करिष्यामीति फले व्रजति गच्छतीत्यर्थः) अत्र व्रजति इदमुपपदं तस्मान्निर्धार्य करिष्यामीति भविष्यद्रूपम्। अत्र करिष्यामि करिष्यति व्रजति। इति, एतेषां रूप सिद्धिरग्रे भविष्यति भू धातोः प्रयोगोपि तद्वदेव भविष्यति भविष्यामिव्रजतीति॥४३॥

अथेदानीं लोट् प्रत्यय विवरणम्॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

२१९४॥ लोट् च ॥ ३।३।१६२॥ (४४॥) विध्यादिष्वर्थेषु लोट् स्यादिति॥ `परे 'विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् (२२०८) ३।३।१६१ इत्यनेन सूत्रेण कथितार्थे धातोः परे लोट् प्रत्ययोपि स्याच्च ॥४४॥ ॥२१९५॥ आशिषि लिङ्लोटौ॥

३।३।१७३॥ (४५) आशिषीति। आशिस् स्त्री॰ आ माङि॰ शास- आशंसायां अ प्रासस्य मासी च्छा याम्। इष्टार्थशंसनेन भ्वादि॰ आत्म॰ सक॰ सेट्। क्वा नेट्। प्रायेणाङ्पूर्वकः। आशंसते आशंसिष्ट। आशीर्वादेपि। अदा॰ आत्म॰ सक॰ सेट्। क्वा वेट्। प्रायेणाङ्पूर्वः। आशास्ते आशासिष्ट। इति। क्विप् इत्वम्। हितप्रार्थनमभीष्टवृद्धिप्रार्थनं चेति। धातोः परे लिङ् लोटौ स्यातामाशीर्वादार्थे। आशीर्वादः पु॰ आशिषो वादः वद वाक्ये संदेशे च भ्वा॰ उ॰ सक॰ सेट्। वदति ते अवादीत् अवदिष्ट। घञ्। मंगलप्रार्थनमाशीर्वचनं चेति। 'भू लोट्'। लोट् स्थाने तिबादिप्रत्ययाः। सार्वधातुकत्वात् शप् (अ) विकरणं। 'भू अ ति' सार्वधातुकार्धधातुकयोः ७।३।८४। (२१६८) अनयोः परयोरिगन्तांगस्य गुण इत्यनेन भू अस्येगंतांगस्य गुणः। भो अ ति। ततो भवति इति सिध्यते ॥४५॥

२१९६॥ एरुः ॥३।४।८६॥ (४६) लोटः इकारस्य उः स्यात्। इति। लोट् संबंधी अर्थात् 'ति' 'अंति' अत्रस्थो य इकारस्तत्स्थाने उकारः स्यात्। तु अंतु इमानि रूपाणि स्युः। भवतु ॥ ४६॥

२१९७॥ तुह्योस्तातङाशिष्यन्यतरस्याम्॥ ७।१।३५॥

(४७) आशिषि तुह्योस्तातङ् वा स्यात्। अनेकाल्त्वात्सर्वादेशः॥ इति। आशिषीति। आशीर्वादार्थे सति तुह्योः तु हि अनयोश्च 'सेर्ह्यपिच्च ३।४।८७ (२२०१) लोटः सेः हिः स्यात् सोऽपिच्चेत्यस्यादेशस्य स्थाने विकल्पेन तातङ् (तात्) आदेशः स्यात्। 'अनेकाल्त्वात्सर्वादेशः'। अयमनेकाल् आद्यस्य सर्वरूपाणामादेशः॥ यद्यपि ङिच्चेत्ययमपवादस्तथाप्यनन्यार्थ ङित्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थतया संभवत्प्रयोजनङकारे तातङि मंथरं प्रवृत्तः परेण बाध्यते। इष्टोत्सर्गापवादयोरपि समबलत्वात्। भवतात्। इति। यद्यपीति। यद्यपि 'ङिच्च १।१।५३ (४३)

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अयमप्यंत्यस्यैव स्यात् सर्वस्येत्यस्यापवादः। अयं 'अनेकाल्शित् सर्वस्य'
१।१।५५(४५) अस्यापवादः। सामान्यसूत्रापेक्षयाऽपवादो बलीयः। अपवा
दो नाम विशेषविधिरूप बाधकः। बलीयस् त्रिलिंगः। अतिशयेन बली बलि
न् शं॰ ईयसु। अत्यंत बलवानित्यर्थः। अतोऽस्यैव कार्ये योऽन्त्यादेशः स
प्रवृत्तो भवेत्तथापि यत्र अंत्यादेशं विना ङित्वस्यान्य कार्यासंभवात्तत्र
'अनङ् सौ' ७।१।९३(२५०) अत्रस्योऽनङादेशः, तथैव 'अवङ् स्फोटा
यनस्य' ६।१।१२३(९८) अत्रस्योऽवङादेशः, इत्यादि स्थलेषु ङिच्चेति सू
त्रस्य चारितार्थ्यमागतम्। एवंच सूत्रस्योदाहरणानि प्राप्तानि, परं गुणवृद्धी
रत्र निषेधः। संप्रसारणं (यणः स्थाने जायमान इक्संज्ञवर्णः संप्रसार
णसंज्ञं स्यात्।) अकारलोप अर्थे त्वं यत् ङित्वस्येतरं फलं तस्मात् यत्र य
त्फलं संभवति तदर्थे तातङ्. अत्रस्य ङकारस्य प्रयोजनमस्ति। अं
त्यादेशार्थे न च तातङ्. अतएव ङिच्चास्य सूत्रस्यात्र अंथरेण मंदग
त्या प्रवृत्तिरागता तस्मादत्र 'अनेकाल्शित्' अयमुत्सर्गः सामान्यसू
त्रं सामान्य विधानमिति वैयाकरणाः। 'ङिच्च' अयं चापवादः। अनयो
र्द्वयोः समानबलत्वात् ङिच्चास्यापवादत्वं गतं, तदनंतरं 'अनेकाल्
शित्सर्वस्य' इत्यस्य परत्वात् ङिच्चास्य बाधस्तस्मादनेकाल्त्वात् स
र्वादेश एव स्यात्। भवतात्॥ ङित्वस्यान्य फलमित्युक्तं तद्यथा।
सामान्यतः 'सार्वधातुकार्धधातुकयोः' ७।३।८४(२१६८) अनयोः परयो
रिगंतांगस्य गुणः इत्यनेन धातोरंत्य इकस्य च 'पुगंतस्य लघूप-
धस्य च' ७।३।८६।(२१८९) पुगंतस्य लघूपधस्य चांगस्येको गुण इत्यने
न गुण प्रतिषेध उपधा इकस्य गुण प्राप्तिः परं तातङ् अस्य ङित्वार्थे
'क्ङिति च' १।१।५(२२१७) गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न
स्त इत्यनेन गुण प्रतिषेधः। अत्रोदाहरणं। अदादिकेषु यु धातोः सकाशा
त् 'युतात्' द्विष् धातो र्द्विष्टात् 'मृजेर्वृद्धिः' ७।२।११४(२४७३) मृ
जेरिको वृद्धिः स्याद्धातु प्रत्यये परे इत्यनेन मृज धातो र्वृद्धिः प्राप्ता
परं परे तातङि सति तस्य ङित्वार्थे क्ङिति च इत्यनेन वृद्धि
प्रतिषेधो भूत्वा मृष्टात् इदं रूपं स्यात्। ग्रहि ज्या वयि व्यधि वष्टि
विचति वृश्चति पृच्छति भृज्जतीनां ङिति च ६।१।१६(२४१२)
एषां किति ङिति च संप्रसारणं, इत्यनेन तातङ् परः अस्य ङि॰

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ङित्वार्थं 'वश कांतौ' अस्य धातोः संप्रसारणमभूत्। 'उष्टात्'। रुधादिभ्यः श्नम् ३।१।७८(२५४३) इत्यनेन रुध् धातोः श्नम् (न) विकरणं भूत्वा 'रुणद्धु' एतत् लोटः एकं रूपं स्यात्। परं द्वितीयरूपे तातङ् अस्य ङित्वार्थे श्नम् (न) अत्रस्थाकारस्य लोपो भूत्वा 'रुंधात्' एतद्रूपं स्यात्। इत्थं ङित्वस्यान्यफलं प्रतिपादितं तद्विदो विदां कुर्वन्त्विति अलं लेखनेन॥ ४७॥ इदं कौमुदीमहोत्साहे द्रष्टव्यं॥

२१९८॥ लोटो लङ्वत्॥ ३।४।८५॥(४८)॥

लोटः लङ इव कार्यं स्यात्। तेन तामादयः सलोपश्च। तथाहीति॥

लोटइति। लङः स्थाने यद्वत्कार्यं तद्वल्लोटः स्थानेस्यात्। लङः स्थाने "तस्थस्थमिपां तां तं तामः" इति सूत्रे कथिता आदेशा अथ तस्योत्तर सूत्रे 'नित्यं ङितः' इत्यस्मिन् कथितः सलोप एते लोटोपि स्युरित्यर्थः। परं लङिमितेनांगस्य 'लुङ्लङ्लृङ्क्ष्वडुदात्तः ६।४।७१(२२०६) एषु परेषु अंगस्य अट् आगमः स्यात् सचोदात्तः' इत्यनेन यो ऽडागमः (अ) स्यात् सोत्रन संभवति। तथाहि। ताम् इत्यादय आदेशास्ते यथा॥ ४८॥ ॥२१९९॥

तस्थस्थमिपां तान्तन्तामः॥ ३।४।१०१॥ (४९)॥

ङितश्चतुर्णां तामादयः क्रमात्स्युरिति॥ ङितइति। लङ् लिङ् लुङ् लृङ् एतेषां चतुर्णां ङितां स्थाने ये तस् थस् थ मिप्। एते चत्वारः प्रत्ययास्तेषामनुक्रमेण ताम् तम् त अम्। एते चत्वार आदेशाः स्युः॥ ४९॥

२२००॥ नित्यं ङितः॥ ३।४।९९॥(५०)॥ सकारांतस्य ङिदुत्तमस्य नित्यं लोपः स्यात्। अलोंत्यस्य इति सस्य लोप इति॥ सकारान्तइति। लङादीनां चतुर्णां संबंधी सकारांत इति य उत्तमपुरुषप्रत्ययः वस् मस् तस्य नित्यं लोपः स्यात्। 'अलोऽन्त्यस्य १।१।५२(४२) षष्ठीनिर्दिष्टांत्यस्यादेशः। इत्यमंत्य सकारस्य लोपः॥ लङः कार्यं दर्शयितुं पूर्वसूत्रस्य समीपमिदं सूत्रं लिखितं। अस्य कार्यं परे आडुत्तमस्य पिच्चेति सूत्रे ३।४।९२ वर्तते॥ भू अ तस्। भव तस्। अंत्ये भवताम्। तथैव भू अ झि, भव झि, भव अंति। अंत्येच एरुः ३।४।८६ लोट् इकारस्य उः स्यात्' इत्यनेन भवंतु। परे सि प्रत्यये भव सि इति स्थितौ॥ ५०॥

२२०१॥ सेर्ह्यपिच्च॥ ३।४।८७॥(५१)॥ लोटः सेः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com